मरः ॥ आँठु इति भाषा ।

अस ल भावे । ( अदां-परं-अकं-सेट् ।) भावः सत्ता । सा चेह विद्यमानतैव । ल अस्ति विष्णुः । इति दुर्गादासः ॥ ( वि+अति ) । अतिक्रमे । पराभवे । "अन्यो व्यतिस्ते तु ममापि धर्म्मः" इति भट्टौ । (अभि) भागसत्तायाम् । "यदत्र ममाभिस्यात् दीयताम्" । इति पाणिनिः । (आविस्) आविर्भावे ।

"तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्" । इति कुमारे । (प्रादुस्) प्रादुर्भावे । उद्भवे ।

"महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः" । इति मनुः ।)

अस इ र् य उ क्षेपे । (दिवां-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ य अस्यति । उ असित्वा अस्त्वा । इर् आस्यत् आसीत् । अस्यमानं महागदा इति भट्टौ तार्क्ष्यीत्ये श्रतुः शानः । इति दुर्गादासः ॥

("तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः" । इति रघुवंशे । (अति) अतिक्रमे । पराभवे ।

"बहुभिश्चैकमत्यस्यन्नेकेन च बहून् जनान्" । इति रामायणे । (वि+अति) उत्ताने ।

"व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" । इति मनुः । (अप) दूरनिक्षेपे ।

वीरानपास्यज्जनकस्य कन्या

नेयं प्रतिज्ञा मम दत्तपूर्व्वा" ।

इति रामायणे । (अभि) अभ्यासे ।

"अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" । इति कुमारे । (नि) निक्षेपे । "न मद्विधो न्यस्यति भारमुग्रम्" । इति भट्टौ । (उप+नि)प्रस्तावे । "स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः" । इति किराते । (सं+उप+नि) प्रमाणादिना दृढ़ीकरणे ।

"त्वया च मया समुपन्यस्तेष्वपि मन्त्रेष्ववज्ञानं वाक्पारुष्यञ्च कृतम्" । इति हितोपदेशे । (प्रति +नि) स्थापने ।

"तथैवायुधजालानि भ्रातृभ्यां कवचानि च ।
रथोपस्थे प्रतिन्यस्य सचर्म्म कठिनं च यत्" ॥

इति रामायणे । ( निर् ) दूरीकरणे । पराभवे ।

"यशांसि सर्व्वेषुभृतां निरास्थत्" ।

"तानर्द्दिदरखादीच निरास्थच तलाहतान्" ॥

इति च भट्टौ । (परि) विस्तृतौ । "पर्य्यस्यन्निह निचयः सहस्रसंख्यां" । किराते ॥ "ताम्रोष्ठपर्य्यस्तरुचः स्मितस्य" । इति कुमारे ॥ पातने च ।

"दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् सदा" । इति मानवे ॥ (सम्) संयोगे । एकत्र संश्लेषे । यथा,—

"सर्व्वोऽप्यत्रयवोऽङ्गा समस्यते ।"

"अव्ययं समर्थेन सह समस्यते ॥"

इति च पाणिनिः ॥ इत्यादिः ॥

अस ञ् अघार्थे । (भ्वादिं-उभं-सकं-सेट् ।) अघार्थो दीप्तिग्रहणगतयः ॥ "वासुदेवं परित्यज्य योऽन्यदेवमुपासते" । उपगच्छतीत्यर्थः । तावण उत्पाद्य इवास यत्न इत्यादिसिद्धौ अनेकार्थत्वात् सत्तार्थोऽयमपीति रमानाथः । अनुप्रयोगादन्यत्रापि परोक्षायामस्तेर्भूभावं केचिन्नेच्छन्तीति धातुप्रदीपः । इति दुर्गादासः ॥

असंख्यः,त्रि, असंख्यनीयः । संख्यारहितः । अपरिमितः । न विद्यते संख्या यस्येति बहुव्रीहिः । अगणनीयः । यथा,—

"असंख्यं द्विपरार्द्धादि पुद्गलात्मात्यनन्तकं" ।

इति हेमचन्द्रः ॥ अपि च ।

"शतयोजनविस्तीर्णैः शतस्कन्धसमन्वितैः ।
असंख्यशाखानिकरैरसंख्यफलसंयुतैः" ॥

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥

असंख्यातं, त्रि, संख्यारहितं । यथा । मदनपारिजाते ।

"अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घितं ।
असंख्यातञ्च यज्जप्तं तत्सर्व्वं निष्फलं भवेत्" ॥

इत्याह्निकाचारतत्त्वं ॥

असंस्कृतः, त्रि, (न संस्कृतः । नञ्समासः ।) संस्काररहितः । यथा । आपस्तम्बः ।

"असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः" ।

इति शुद्धितत्त्वं ॥ अन्यच्च ।

"असंस्कृतप्रमीतस्य पिता न श्राद्धमाचरेत् ।
यदि स्नेहाचरेच्छ्राद्धं सपिण्डीकरणं विना" ॥

इति ।

"असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्य्यादिति धर्म्मो व्यवस्थितः" ॥

इति च श्राद्धतत्त्वं ॥

असंस्कृतवाक्यं, क्ली, (असंस्कृतं संस्कृतेतरं वाक्यम् ।) संस्कृतेतरभाषा । तत्पर्य्यायः । अपभ्रंशः २ अपशब्दः ३ । इत्यमरटीका ॥

असंस्थानं, क्ली, असंस्थितिः संस्थानाभावः । न संस्थानमसंस्थानमिति नञ्समासनिष्पन्नं ॥

असंहतः, पुं, (न संहन्यते येन । न+सम्+हन् +करणे क्त ।) व्यूहविशेषः । स तु सेनानां पृथग्वृत्तिः । इति रायमुकुटादयः ॥ ( दण्डः । भोगः । मण्डलः । ) असमूहिते अहते च त्रि ॥

असंहतः, त्रि, असंलग्नः । संहतो लग्नः न संहतः असंहतः इति नञ्समासनिष्पन्नः ॥

असकृत्, व्य, ( न सकृत् । नञ्समासः । ) पुनः पुनः । वारं वारं । इत्यमरः ॥

("अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा" । इति साहित्यदर्पणे ।

"अन्नाद्येनासकृच्चैतान् गुणैश्च परिचोदयेत्" । इति मानवे ।)

असङ्कल्पितः, त्रि, (न सङ्कल्पितः । नञ्समासः ।) सङ्कल्पाविषयः । यथा । विष्णुपुराणे ।

"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ते त्वमलाः प्रयान्ति" ॥

इति मलमासतत्त्वं ॥

असङ्कुलः, पुं, (न सङ्कुलः ।) विस्तृतः पन्थाः । इति हेमचन्द्रः ॥

असङ्ख्यः, त्रि, सङ्ख्यारहितः । अगणनीयः । स तु द्विपरार्द्धादिः । इति हेमचन्द्रः ॥

असकृतः, त्रि, ( न सङ्कृतः । नञ्तत्पुरुषः । ) सङ्कृतिरहितः । नासङ्कृतं प्रयुञ्जीतेति प्रसिद्धिः ॥ यथा । वस्तुतस्तु जिज्ञासुमेकपुरुषं प्रति सङ्कृतमपि अतादृशमन्यं प्रति असङ्कृतमिति यं प्रतिपादयितुमानन्तर्य्याभिधानं तादृशाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थः तं प्रति सङ्कृतिरिति पुरुषविशेषनियन्त्रितं सङ्कृतित्वं वाच्यं । इत्यनुमितिग्रन्थीयगदाधरी ॥ अयुक्तः । यथा देवीपुराणं ।

"घस्रद्वये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मभसंयुता च ।
असङ्कृता येन दिनद्वयेऽपि
पूज्या परा या भवतीह यत्नात्" ॥

इति तिथ्यादितत्त्वं ॥ (असभ्यः । अशिक्षितः । यथा हितोपदेशे ।

"आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसङ्कृतं वा" ॥)

असती, स्त्री, ( न सती साध्वी । नञ्समासः । ) भ्रष्टा । व्यभिचारिणी तत्पर्य्यायः । पुंश्चली २ धर्षिणी ३ बन्धकी ४ कुलटा ५ इत्वरी ६ स्वैरिणी ७ पांशुला ८ । इत्यमरः ॥ दृष्टा ९ दुष्टा १० धर्षिता ११ । इति शब्दरत्नावली ॥ लञ्जा १२ निशाचरी १३ चपारण्डा १४ । इति जटाधरः ॥ ("आबाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्" । इति धर्म्मविवेके । )

असतीसुतः, पुं, स्त्री, ( असत्याः सुतः । ) व्यभिचारिणीपुत्त्रः । तत्पर्य्यायः । बान्धकिनेयः २ बन्धुलः ३ कौलटेरः ४ कौलटेयः ५ । इत्यमरः ॥

"बन्धुलः कौलटेरश्च कौलटेयोऽसतीसुतः ।
तथा बान्धकिनेयस्तु स्यात् कौलकेय इत्यपि ॥
अथ सत्यान्तु भिक्षुक्यां पुत्त्रो भवति यः पुनः ।
तत्र कौलटिनेयः स्यात्कौलटेयोऽपि स स्मृतः" ॥

इति शब्दरत्नावली ॥ अपि च । असतीसूनुः कौलटेरश्च बन्धुलः ।

"अपि बान्धकिनेयः स्यात्कौलटेयोऽतिभिक्षुकी ।
कुलटापि सती सा चेत् कौलटेयस्तदात्मजः ॥
अपि कौलटिनेयः स्यात्" । इति जटाधरः ॥

असतीसूनुः, पुं, (असत्याः सूनुः ।) कुलटापुत्त्रः । इति जटाधरः ॥

असत्, त्रि, ( अस्+शतृ ततो नञ्समासः । ) अविद्यमानं । असाधुः । मूर्खः । ब्रह्मभिन्नवस्तु । इति वेदान्तः ॥ जड़वर्गः । यथा,—

"यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्व्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा" ॥

इति देवीमाहात्म्ये १ अध्यायः ॥ सत् चेतनवर्गः । असत् जड़वर्गः ।

"तस्य सर्व्वस्य या शक्तिः सा यदा त्वं तदा कथं" । स्तव्येत्यर्थः । इति तट्टीकायां नागोजीभट्टः ॥ * ॥ निष्फलं । यथा,—

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।